**त्रिचक्षुस्** पु० त्रीणि चक्षूंष्यस्य । त्रिनेत्रे शिवे "त्रिचक्षुः शम्भुरेकस्त्वं विभुर्दामोदरोऽपि च" भा० शा० ४३ अ० ।

**त्रिचतुर** त्रि० । त्रयो वा चत्वारो वा विकल्पार्थे बहु० डच् समा०। विकल्पेन त्रित्वचतुष्कसंख्यान्विते(तिन वा चार) अर्थे । "सद्यः पुरीपरिसरे च शिरीषमृद्वी गत्वा जवात् त्रिचतुराणि पदानि सीता" सा०द० ।

**त्रिचित्** पु० त्रीन्+अग्नीन् चिनोति स चि—भूते क्विप् । अतीताग्नित्रयचयनकर्त्तरि ।

**त्रिचित** पु० त्रिभागोत्सेधाभिरिष्टकाभिः चितः । गार्हपत्येऽग्निभेदे । "त्रिचितमित्येके" कात्या० श्रौ० १७। १।२२ । "गार्हपत्यं कुर्वन्ति तत्र च त्रिभागोत्सेधा इष्टका इति सम्प्रदायः। अस्मिंश्च पक्षे प्रथमचितिः लोकंपृणानां पूरणं स्मृग्यम्" कर्कः । "उपर्य्येव चितित्रयात्मकं चिनोति । अथ यो गार्हपत्योऽग्निः सोऽस्यावाङ् प्राणाः तं हैके त्रिचितं चिन्वन्ति" शत०ब्रा० ७।१।२।१५ ।

**त्रिजगत्** न० त्रिगुणितं जगत् संज्ञात्वात् कर्मधारयः । स्वर्गमर्त्यपातालरूपे लोकत्रये "तस्यां शिवस्त्रिजगतो जनको जनन्याः" भाग० ८।८।१९ श्लो० । त्रिजगत्यप्यत्र स्त्री "अन्तराल एव त्रिजगत्यास्तु दक्षिणस्याम्" भाग० ५।२६।६ श्लो० ।

**त्रिजटा** स्त्री तिस्रो जटा यस्याः ।१रावणालयस्थे सीतापक्षपातिराक्षसीभेदे "सीतां ताभिरनार्य्याभिर्दृष्ट्वा संतर्जितां तदा । राक्षसी त्रिजटा वृद्धा प्रबुद्धा वाक्यमब्रवीत्" । "एवमुक्तास्त्रिजटया राक्षस्यः क्रोधमूर्च्छिताः" रामा०२७ अ०"हनुमानपि विक्रान्तः सर्वं शुश्राव तत्त्वतः । सीतायास्त्रिजटायाश्च राक्षसानाञ्च गर्ज्जितम्" ३० अ० । "सीतां मायेति शंसन्ती त्रिजटा समजीवयत्" रघुः । २शिवे पु० । "त्रिजटाय त्रिशीर्षाय त्रिशूलायुधपाणिने । त्र्यम्बकाय त्रिनेत्राय त्रिपुरघ्नाय वै नमः" भा० अनु० २८६ । ३विल्ववृक्षे पु० । "शृणु देवि ! प्रवक्ष्यामि रहस्यं त्रिजटोत्तमम् । पत्रं ब्रह्ममयं देवि ! अद्भुतं वरवर्णिनि ! । श्रीशैलशिखरे जातः श्रीफलः श्रीनिकेतनः । विष्णुप्रीतिकरश्चैव मम प्रीतिकरः सदा । ब्रह्मविष्णुशिवाः पत्रे वृन्ते च शक्तिरूपिणी । वृन्तमूले तु वज्रं स्यात् पत्रं ब्रह्म त्विदं प्रिये ! । एवञ्च त्रिजटापत्रैर्हरं वा हरिमर्च्चयेत् । कैवल्यं तस्य तेनैव शक्तिपूजा विशेषतः" ज्ञानभैरवीतन्त्रे ६प० ।

**त्रिजात** न० त्रिगुणितं जातं सुगन्धिद्रव्यरूपं सुन्दरद्रव्यं संज्ञात्वात् कर्म्म० । १तुल्यभागे त्वगेलापत्ररूपे मिलिते- सुगन्धिद्रव्यभेदे । स्वार्थे क । त्रिजातक तत्रार्थे "त्वगेलापत्रकैस्तुल्यैस्त्रिसुगन्धि त्रिजातकम् । नागकेशरसंयुक्तं चतुर्जातकमुच्यते" राजनि०।"एलादिभिः समुद्दिष्टं त्रिजातं त्रिसुगन्धिकम् । चतुर्जातं सनागञ्च द्वयं वातकफापहम्" "शीतं त्रिजातात्तमथो विमृद्य योगानुरूपा गुटिकाः प्रयोज्याः" "व्योषं त्रिजातकं मुस्ता विड़ङ्गामलके तथा" सुश्रु० ।

**त्रिजीवा** स्त्री त्रिषु राशिषु जीवा । त्रयाणां राशीनां ज्या-३४३८ संख्यारूपे ज्यार्द्धरूपे पदार्थे "लम्बज्याघ्न-त्रिजीवाप्तः स्फुटो भूपरिधिः स्वकः" सू० सि० ।"त्रिज्यया गजाग्निवेदराम ३४३८ सितया भक्तः" रङ्गना० । त्रिज्याद्योऽप्यत्र । "तच्छेषं विवरेणाथ हन्यात् त्रिज्यान्त्यकर्णयोः" सू० सि० "त्रिज्यान्त्यकर्णयोस्त्रिराशिज्याद्वितीयशीघ्रकर्णयोः" रङ्गना०।

**त्रिण** न० तृण+पृषो० । तृणशब्दार्थे शब्दरत्ना० । तृणशब्दव्युत्पत्तौ रेफेकारसंयुक्तमव्युत्पन्नशब्दान्तरमस्तीति उज्ज्वलद० । "उद्वृत्तिस्त्रिणपत्रपांशुविहगः सौम्यस्वनः पूजितः" वराहः ।

**त्रिणता** स्त्री त्रिषु स्थानेषु नता संज्ञात्वात् पूर्वपदात् णत्वम् । १धनुषि त्रिका० । २त्रिषु स्थानेषु नते त्रि० । असंज्ञायां न णत्वमिति भेदः । "स्वगुणैराफलप्राप्तेराकृष्य गणिका इव । कामुकानिव नालीकांस्त्रिणताः सहसाऽमुचन्" माघः । वेश्यानां मध्यम्भूषु त्रिषु स्थानेषु नतत्वात् त्रिणतत्वं श्लेषे णनकारयोरभेद इत्यालङ्कारिकाः । त्रिणस्य भावः तल् । ३तृणभावे तृणत्वे च स्त्री ।

**त्रिणव** पु० त्रिरावृत्तानव डच्समा० संज्ञात्वात् णत्वम् । सप्तविंशावृत्ते सामस्तोमभेदे । "त्रिणवत्रयस्त्रिंशौ स्तोमौ हेमन्तशिशिरावृतू" यजु० १०।१४ । "त्रिणवस्तोम एव माम्नातः "नवभ्यो हिंकरोति स तिसृभिः स पञ्चभिः स एकया" नवभ्यो हिङ्करोति स एकया स तिसृभिः स पञ्चभि, नवभ्यो हिङ्करोति स पञ्चभिः स एकया स तिसृभिर्वर्जो वै त्रिणव इति" श्रुतिः । "प्रथमपर्य्याये प्रथमां त्रिर्गायेत् मध्यमां पञ्चकृत्वः उत्तमां सकृत्, द्वितीयपर्य्याये प्रथमां सकृद्गायेन्मध्यमां त्रि,रुत्तमां पञ्चकृत्वः,तृतीयपर्य्याये प्रथमां पञ्चकृत्वो, मध्यमां सकृ,दुत्तमां त्रिर्गायेत् सोऽयं त्रिरावृत्तनवसंख्योपेतत्वात् त्रिणवको वज्रसमानः स्तोमः" वेददी० । "त्रिणवान्युक्थानेकविंशानि पृष्ठानि षट्-